# संस्कृत
# सप्तम् कक्षा
# श्रुति जायसवाल

# सप्तमकक्षा

# रुचिरा




## अनुशिक्षणम्

(Tutorial)

## प्रथमः पाठः

# सुभाषितानि

# पाठस्य सविवरणं वाचनम्

## सुभाषितम्

सु + भाषितम्

सुन्दरम्/ उत्तमं/ शोभनम् — वचनम्/ विचारः

सुभाषितम् = सुन्दरं वचनम् / good saying

सुभाषितम् – (नपुंसकलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा-विभक्तिः | सुभाषितम् | सुभाषिते | सुभाषितानि |

# वाचनम्

प्रथमः पाठः

## सुभाषितानि

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥ 1 ॥

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥ 2 ॥

दाने तपसि शौर्ये च विज्ञाने विनये नये ।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥ 3 ॥

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥ 4 ॥

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥ 5 ॥

क्षमावशीकृतिर्लोके क्षमया किं न साध्यते ।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥ 6 ॥

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥१॥

*अन्वयः -*

पृथिव्यां त्रीणि रत्नानि (सन्ति) - जलम्, अन्नं, सुभाषितम् (इति)। (परन्तु) मूढैः पाषाणखण्डेषु (एव) रत्नसंज्ञा विधीयते।

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।

पृथिवी – (स्त्रीलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सप्तमी-विभक्तिः | पृथिव्याम् | पृथिव्योः | पृथिवीषु |

पृथिवी = भूमिः

पृथिव्याम् = भूमौ/ धरती पर/ on the earth

त्रीणि = तीन, three

(नपुंसकलिङ्गम्), सर्वदा - बहुवचनम्

रत्नानि = श्रेष्ठवस्तूनि/ gems

रत्न – (नपुंसकलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | रत्नम् | रत्ने | रत्नानि |



## पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।

- **पृथिव्यां कति रत्नानि सन्ति?**
  - ✓ पृथिव्यां त्रीणि रत्नानि सन्ति।

- **पृथिव्यां त्रीणि रत्नानि कानि सन्ति?**
  - ✓ पृथिव्यां त्रीणि रत्नानि सन्ति - जलम्, अन्नम्, सुभाषितम्।



जलम्



अन्नम्



सुभाषितम्

## पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।

- **किमर्थं सुभाषितं वदति " पृथिव्यां त्रीणि एव रत्नानि " इति?**

❑ **स्फटिकः, गोमेदः, माणिक्यं, मौक्तिकं, हीरकं इत्यादीनि रत्नानि सन्ति वा?**

- ✓ स्फटिकः, गोमेदः, माणिक्यं, मौक्तिकं, हीरकं इत्यादि विना अपि जीवनं शक्यम् अस्ति।
- ✓ परन्तु जलं विना जीवनम् अशक्यम्।
- ✓ भोजनं विना जीवनम् अशक्यम्।
- ✓ उत्तम-विचारं विना अपि जीवनम् अशक्यम् अस्ति।

## मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥१॥

मूढैः = मूर्खैः / by the fools

मूढ – (पुंलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तृतीया विभक्तिः | मूढेन | मूढाभ्याम् | मूढैः |

रत्नसंज्ञा = रत्नस्य नाम / name of gem

पाषाणखण्डेषु = शिलाखण्डेषु / पत्थर के टुकडों में / in the stone pieces.

पाषाणखण्ड – (पुंलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सप्तमी विभक्तिः | पाषाणखण्डे | पाषाणखण्डयोः | पाषाणखण्डेषु |

## मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥१॥

क्रियापदम् - विधीयते।

विधीयते = किया/समझा जाता है, is done / given.



## मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥१॥



- किं विधीयते?

  रत्नसंज्ञा विधीयते।

- कैः रत्नसंज्ञा विधीयते?

  मूढैः रत्नसंज्ञा विधीयते।



- कुत्र रत्नसंज्ञा विधीयते?

  पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥१॥

तात्पर्यम् -

❑ जलं, भोजनं, सुवचनानि च अस्माकं जीवने महत्त्वपूर्णानि सन्ति।

❑ यतो हि जलं विना जीवनम् अशक्यम्।

❑ भोजनं विना शरीरस्य पोषणम् असाध्यम् अस्ति।

❑ तथा सुवचनानि विना नैतिकविकासः न सम्भवति।

❑ तस्मात् बुद्धिमन्तः जनाः जलम् अन्नं सुभाषितं च अमूल्यरत्नानि इति वदन्ति।

- ❑ भोजनं विना शरीरस्य पोषणम् असाध्यम् अस्ति।
- ❑ तथा सुवचनानि विना नैतिकविकासः न सम्भवति।
- ❑ तस्मात् बुद्धिमन्तः जनाः जलम् अन्नं सुभाषितं च अमूल्यरत्नानि इति वदन्ति।
- ❑ किन्तु सामान्याः जनाः शिलाखण्डेषु रत्नानि पश्यन्ति।

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥१॥

Meaning -

There are only three gems on the earth namely water, meal and good sayings. (But) the stone-pieces are named as gems by fools.

अर्थ -

पृथ्वी पर तीन ही रत्न हैं - जल, अन्न और सुभाषित। परन्तु मूर्खों के द्वारा पत्थरों के टुकडों को ही रत्न की संज्ञा दी जाती है।

➢ अस्माकं देशस्य ध्येय-वाक्यं किम् अस्ति?

✓अस्माकं भारतदेशस्य ध्येय-वाक्यम् अस्ति "सत्यमेव जयते" इति।

✓अर्थात् सत्यस्य एव जयः भवति।




सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥२॥

पदविभागः -

**सत्येन, धार्यते, पृथ्वी, सत्येन, तपते, रविः, सत्येन, वाति, वायुः, च, सर्वम्, सत्ये, प्रतिष्ठितम्।**

अन्वयः -

**पृथ्वी सत्येन धार्यते। रविः सत्येन तपते। वायुः सत्येन वाति च। सर्वं सत्ये प्रतिष्ठितम् (अस्ति)।**

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥२॥

## अस्मिन् श्लोके चत्वारि वाक्यानि सन्ति-

१) पृथ्वी सत्येन धार्यते।

२) रविः सत्येन तपते।

३) वायुः सत्येन वाति।

४) सर्वं सत्ये प्रतिष्ठितम्।



सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥२॥

### १) "पृथ्वी सत्येन धार्यते।"

पृथ्वी = धरा

सत्येन = सत्यस्य द्वारा/ by the universal truth

सत्य – (नपुंसकलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तृतीया-विभक्तिः | सत्येन | सत्याभ्याम् | सत्यैः |



धार्यते = धारणं क्रियते / bears

धार्यते:
- धृ -धातुः
- कर्मणिप्रयोगः passive voice
- लट्-लकारः
- प्रथम पुरुषः
- एकवचनम्

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥२॥

## कथं पृथिवी सत्येन धृता अस्ति?

- पृथिव्यां बहवः व्यवहाराः भवन्ति।
- सत्यस्य कारणेन व्यवहारः सुगमः भवति।
- यदि सत्यं नास्ति तर्हि पृथिव्याम् अनाचारः भवति। सर्वं अव्यवस्थितं भवति।
- सत्येन एव पृथिव्याः सुस्थितिः भवति।
- पृथिवी सर्वेषां रक्षणं, पोषणं च करोति।
- ऋषयः वदन्ति यत् पृथ्वी सत्येन धृता अस्ति।

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥ २॥

२) "रविः सत्येन तपते।"

रविः = सूर्यः/ The sun



रवि – (पुंलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | रविः | रवी | रवयः |

तपते = तपता है, shines/ heats/ burns

तपते → तप्-धातुः, लट्-लकारः, प्रथम पुरुषः, एकवचनम्, आत्मनेपदिरुपम्

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥ २॥

## कथं सूर्यः सत्येन तपते?

- सूर्यः नियतसमये उदयं प्राप्नोति तथा नियतसमये अस्तं गच्छति।
- सूर्यः सर्वदा औष्ण्यं ददाति, तापं ददाति।
- सः सर्वदा प्रकृतिनियमं पालयति।
- सः प्रकृतितत्त्वस्य उल्लङ्घनं न करोति।
- रविः सत्येन तपते।



सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥ २॥

३) "वायुः सत्येन वाति।"

वायु – (पुंलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा-विभक्तिः | वायुः | वायू | वायवः |

वायुः = Air

वाति = प्रवहति / blows




- यथा सूर्यः प्रकृतिनियमं पालयति एवं वायुः अपि प्रकृतिनियमं पालयति।

❑ मनीषिणः वदन्ति वायुः सत्यस्य कारणाद् एव प्रवहति।

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥ २॥

४) "सर्वं सत्ये प्रतिष्ठितम्।"

सर्वम् = सकलम्/ everything

सर्वनाम-नपुंसकलिङ्गम्।

सत्ये = In the truth,

सत्य – (नपुंसकलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सप्तमी विभक्तिः | सत्ये | सत्योः | सत्येषु |

प्रतिष्ठितम् = सुस्थितम् / सम्यक् प्रकारेण स्थितम्/ situated

❑ एवं प्रकृतेः सर्वाः शक्तयः स्वनियमं पालयन्ति।

❑ तत्र सत्यम् एव एकं विशिष्टं तत्त्वम् अस्ति।

❑ सत्यं विना न किमपि प्रचलति।

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥ २॥

## तात्पर्यम् -

❑ अस्मिन् श्लोके सत्यस्य महत्त्वं निरूपितम् अस्ति।

❑ इयं भूमिः सत्येन धृता अस्ति।

❑ सूर्यः सत्येन एव तपते।

❑ वायुः अपि सत्यस्य आधारेण एव सञ्चरति।

❑ जगति विद्यमानं सर्वं सत्ये प्रतिष्ठितम् अस्ति।

- जगति विद्यमानं सर्वं सत्ये प्रतिष्ठितम् अस्ति।
- सत्यमेव सर्वेषाम् आधारमूलं शक्तिमूलं च भवति।
- अतः अस्माभिः सर्वदा सत्यस्य पालनं करणीयम्।

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥२॥

Meaning -

The earth is sustained by truth, truth makes sun to warm/heat, air blows by the truth and in this world everything is situated in the truth (only).

अर्थ -

सत्य के द्वारा पृथ्वी को धारण किया जाता है, सत्य के कारण से (ही) सूर्य तपता है, सत्य के कारण से ही वायु बहती है और सब कुछ सत्य में ही प्रतिष्ठित है।

जनाः कुत्र कुत्र अहङ्कारं प्रदर्शयन्ति?

धनेषु, विद्यायां, सौन्दर्ये इत्यादिषु स्थानेषु जनाः अहङ्कारं प्रदर्शयन्ति।

दाने तपसि शौर्ये च विज्ञाने विनये नये।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥३॥

दाने तपसि शौर्ये च विज्ञाने विनये नये।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥३॥

पदविभागः –

दाने, तपसि, शौर्ये, च, विज्ञाने, विनये, नये, विस्मयः, न, हि, कर्त्तव्यः, बहुरत्ना, वसुन्धरा।

अन्वयः –

दाने तपसि शौर्ये विज्ञाने विनये नये च विस्मयः न हि कर्त्तव्यः। (यतो हि) वसुन्धरा बहुरत्ना (अस्ति)।

दाने तपसि शौर्ये च विज्ञाने विनये नये।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥३॥

दाने = दान-कार्येषु / In donation work

दाने = दान-कार्येषु / In donation work

तपसि = तपस्यायाम् / In Penance

शौर्ये = पराक्रमे/ In bravery

विज्ञाने = विशिष्ठज्ञाने/ शास्त्रज्ञाने/ In the scriptural / knowledge

विनये = नम्रतायाम्/ In modesty

नये = नीतौ/ In morality

विस्मयः = गर्वः/ अहङ्कारः / Pride

न हि कर्त्तव्यः = न करणीयम् / नहीं करना चाहिए, Must not be done

दाने तपसि शौर्ये च विज्ञाने विनये नये।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥३॥

➢ कुत्र विस्मयः न हि कर्त्तव्यः?

✓ दाने, तपसि, शौर्ये, विज्ञाने, विनये, नये च विस्मयः न हि कर्त्तव्यः।

| मूलशब्दः | प्रथमा विभक्तिः | सप्तमीविभक्तिः |
|---|---|---|
| दान | दानम् | दाने |
| तपस् | तपः | तपसि |
| शौर्य | शौर्यः | शौर्ये |
| विज्ञान | विज्ञानम् | विज्ञाने |
| विनय | विनयः | विनये |
| नय | नयः | नये |



दाने तपसि शौर्ये च विज्ञाने विनये नये।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥३॥

- किमर्थं विस्मयः न हि कर्त्तव्यः?

वसुन्धरा बहुरत्ना अस्ति । अतः विस्मयः न हि कर्त्तव्यः।

वसुन्धरा बहुरत्ना = भूमिः बहुरत्नैः युक्ता अस्ति /

the earth is endowed with many gems.

- ❑ अस्माकं समाजे बहवः जनाः दानवीराः, शूरवीराः, धैर्यशालीनः, तपस्विनः च सन्ति।
- ❑ अतः एतादृशेषु विषयेषु अस्माभिः गर्वः न हि करणीयः।

दाने तपसि शौर्ये च विज्ञाने विनये नये।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥३॥

तात्पर्यम्-

- अहम् एव दानी अस्मि।
- अहम् एव तपस्वी अस्मि।
- अहम् एव शूरवीरः अस्मि।
- अहं एव ज्ञानी अस्मि।

एवं प्रकारेण अहङ्कारः न करणीयः।





- ❑ यतो हि एतादृशाः जनाः अस्मिन् लोके बहवः सन्ति।
- ❑ बहवः एतान् गुणान् धारयन्ति, न तु एकः एव।



दाने तपसि शौर्ये च विज्ञाने विनये नये।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥३॥

Meaning –

One should not feel pride in his charity, austerity, valour, knowledge, modesty and morality because the world is full of gems.

अर्थ –

किसी को भी अपने द्वारा दिए गए दान में, तपस्या में, वीरता में, शास्त्रज्ञान में, नम्रता में और नीति में अहङ्कार नहीं करना चाहिए। क्योंकि ऐसे गुणों को धारण करने वाले इस संसार में बहुत है सिर्फ कोई एक ही नहीं। इसलिए कहा गया कि यह धरा अनेक रत्नों से युक्त है।

**वयं जीवने बहुभिः जनैः सह वसामः। कीदृशजनैः सह व्यवहारः कर्त्तव्यः इति एतत् सुभाषितं वदति -**

***सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।***
***सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥४॥***

पदविभागः-

सद्भिः, एव, सह, आसीत, सद्भिः, कुर्वीत, सङ्गतिम्, सद्भिः, विवादम्, मैत्रीम्, च, न, असद्भिः, किञ्चिद्, आचरेत्।

अन्वयः-

सद्भिः सह एव आसीत। सद्भिः (सह) सङ्गतिं कुर्वीत। सद्भिः विवादं मैत्रीं (च कुर्वीत)। न असद्भिः (सह) किञ्चित् आचरेत्।

*सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।*
*सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥४॥*

## अस्मिन् सुभाषिते चत्वारि वाक्यानि सन्ति –

- ❑ सद्भिः सह एव आसीत।
- ❑ सद्भिः सङ्गतिं कुर्वीत।
- ❑ सद्भिः विवादं मैत्रीम् च कुर्वीत।
- ❑ न असद्भिः किञ्चित् आचरेत्।

*सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।*
*सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥४॥*

❑ **सद्भिः सह एव आसीत।**

सद्भिः = सज्जनैः, उत्तमैः / with noble people

सत्– (पुंलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तृतीया विभक्तिः | सता | सद्भ्यां | सद्भिः |

एव = केवलम् / Only

आसीत = उपविशेत्।
आत्मनेपदिरूपम्, आस् धातुः,
विधिलिङ्लकारः, प्रथम-पुरुषः, एकवचनम्।

➢ **कैः सह एव आसीत?**

✓ **सद्भिः सह एव आसीत।**
**अर्थात् सज्जनैः सह एव उपविशेत्।**



दाने तपसि शौर्ये च विज्ञाने विनये नये।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥३॥

Meaning –

One should not feel pride in his charity, austerity, valour, knowledge, modesty and morality because the world is full of gems.

अर्थ –

किसी को भी अपने द्वारा दिए गए दान में, तपस्या में, वीरता में, शास्त्रज्ञान में, नम्रता में और नीति में अहङ्कार नहीं करना चाहिए। क्योंकि ऐसे गुणों को धारण करने वाले इस संसार में बहुत है सिर्फ कोई एक ही नहीं। इसलिए कहा गया कि यह धरा अनेक रत्नों से युक्त है।

**वयं जीवने बहुभिः जनैः सह वसामः। कीदृशजनैः सह व्यवहारः कर्त्तव्यः इति एतत् सुभाषितं वदति -**

*सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।*

*सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥४॥*

पदविभागः-

सद्भिः, एव, सह, आसीत, सद्भिः, कुर्वीत, सङ्गतिम्, सद्भिः, विवादम्, मैत्रीम्, च, न, असद्भिः, किञ्चिद्, आचरेत्।

अन्वयः-

सद्भिः सह एव आसीत। सद्भिः (सह) सङ्गतिं कुर्वीत। सद्भिः विवादं मैत्रीं (च कुर्वीत)। न असद्भिः (सह) किञ्चित् आचरेत्।

❑ सद्भिः सह सङ्गतिं कुर्वीत्।

सङ्गतिः = वासः, सहगतिः, गमनागमनम् /Association.
इकारान्त-स्त्रीलिङ्गशब्दस्य द्वितीया विभक्तिः, एकवचनम्।

कुर्वीत = कुर्यात्, करणीयम् / Must do
आत्मनेपदिरुपम्, कृ धातुः, प्रथम-पुरुषः, एकवचनम्।

## सज्जनैः सह सम्मिल्य गमनागमनं कुर्वीत।

*सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।*
*सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥ ४॥*

सद्भिः विवादं मैत्रीं च (कुर्वीत)।

विवादः = वादः / चर्चा / discussion.

विवाद – (पुंलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| द्वितीया विभक्तिः | विवादं | विवदौ | विवादान् |

मैत्रीम् = मित्रतां, सख्यं / Amity, Friendship.

मैत्री– (स्त्रीलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| द्वितीया विभक्तिः | मैत्रीं | मैत्र्यौ | मैत्रीः |

वाक्यार्थः –

- सज्जनैः सह एव चर्चा मित्रता वा करणीया।
- सज्जनैः सह सम्भाषणेन वादेन चर्चया च अस्माकं विचारस्य वृद्धिः भवति।



*सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।*

न असद्भिः किञ्चित् आचरेत्।

- कैः सह किञ्चित् अपि न आचरेत्?

    असद्भिः सह न किञ्चित् अपि आचरेत्।



असद्भिः = दुर्जनैः, दुष्टैः सह/ With wicked people.

असत् – (पुंलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तृतीया विभक्तिः | असता | असद्भ्यां | असद्भिः |

न किञ्चित् = किमपि / nothing

आचरेत् = व्यवहरेत्/ must behave
आ (उपसर्गः)+ चर् धातुः,
विधिलिङ् लकारः, प्रथम-पुरुषः, एकवचनम्।

दुर्जनैः सह किञ्चित् अपि (अल्पम् अपि) न व्यवहरेत्।

*सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।*
*सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥ ४॥*

तात्पर्यम्-

- साधुजनैः (सज्जनैः) सह सर्वदा भवितव्यम्।
- तेषां वचनं श्रुत्वा, कार्यं दृष्ट्वा अस्माकं विकासः भवति।
- दुर्जन सह वासः कदापि मास्तु।
- दुर्जनान् दृष्ट्वा तेषां वचनं श्रुत्वा श्रुत्वा वयमपि अनुकरणं कुर्मः।
- तेन अस्माकं अधोगतिः भवति।
- अतः दुर्जनसङ्गतिः मास्तु।
- सर्वदा सज्जनसङ्गति भवतु।

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥४॥

हिन्द्यर्थः -

इस संसार में सज्जनों के साथ ही बैठना चाहिए, उनके साथ ही सङ्गति करनी चाहिए, सज्जनों के साथ ही वाद-विवाद और मित्रता करनी चाहिए। दुर्जनों के साथ कुछ भी व्यवहार नहीं रखना चाहिए।

आङ्ग्लार्थः –

One should sit with noble people, be with noble people, argue with noble people and make friendship with noble people. Nothing should be done with wicked people.

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्॥५॥

पदविभागः -

धन-धान्य-प्रयोगेषु, विद्यायाः, संग्रहेषु, च,
आहारे, व्यवहारे, च, त्यक्तलज्जः, सुखी, भवेत्।

अन्वयः -

धनधान्यप्रयोगेषु, विद्यायाः संग्रहेषु च (त्यक्तलज्जः सुखी भवेत्)। आहारे व्यवहारे च (अपि) त्यक्तलज्जः सुखी भवेत्।

**धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।**
**आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्॥५॥**

- **कः सुखी भवति?**
  त्यक्तलज्जः सुखी भवति।



**त्यक्तलज्जः** = यः लज्जाम् त्यक्तवान्।

**लज्जा** = सङ्कोचः/ shyness



- वयं कदाचित् लज्जाम् अनुभवामः।
- लज्जा अपेक्षते।
- किन्तु सर्वदा लज्जा न करणीया।

**धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।**
**आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्॥५॥**

- **लज्जा कुत्र कुत्र न करणीया?**

  - धनप्रयोगे लज्जा न करणीया।
  - धान्यस्य अथवा अन्नस्य संग्रहे लज्जा न करणीया।
  - विद्यार्जने लज्जा न भवेत्।
  - भोजनसमये सङ्कोचः न करणीयः।
  - अपि च अन्यदैनिक-व्यवहारेषु अपि स्पष्टतानिमित्तं लज्जा त्यक्तव्या।

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्॥५॥



**धनधान्यप्रयोगेषु त्यक्तलज्जः सुखी भवेत्।**

**धनधान्यप्रयोगेषु** = धनस्य धान्यस्य च उपयोगेषु।
अकारान्त-पुंलिङ्गशब्दस्य सप्तमी-विभक्तिः, बहुवचनम् → धनधान्यप्रयोगेषु।

**त्यक्तलज्जः** = सङ्कोचरहितः / shyless
अकारान्त-पुंलिङ्गशब्दस्य प्रथमा-विभक्तिः, एकवचनम्।

**सुखी** = प्रसन्नः, संतुष्टः / Happy.

सुखिन्- (पुंलिङ्गम्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | सुखी | सुखिनौ | सुखिनः |

**भवेत्** = वर्तेत / Must be.
भू धातुः, विधिलिङ्-लकारः, प्रथम-पुरुषः, एकवचनम्।

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्॥५॥

## वाक्यार्थः –

- धनप्रयोगे लज्जा न करणीया।
- धनस्य दाने स्वीकरणे च गणनाविषये सर्वदा स्पष्टता आवश्यकी। यथा आपणिकः करोति।
- धान्यस्य/ अन्नस्य संग्रहे लज्जा न करणीया।
- तत्र सङ्कोचकरणेन हानिः भवितुम् अर्हति।

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्॥५॥

**विद्यायाः संग्रहेषु च त्यक्तलज्जः सुखी भवेत्।**

विद्यायाः = शिक्षायाः, ज्ञानस्य / of learning or knowledge.
आकारान्त-स्त्रीलिङ्गशब्दस्य षष्ठीविभक्तिः, एकवचनम्।

संग्रहेषु = एकत्रीकरणेषु / in acquiring
अकारान्त-पुंलिङ्गशब्दस्य सप्तमी विभक्तिः, एकवचनम्।

- पठनसमये अस्माकं संशयः भवति।
- तदा सङ्कोचं विना शिक्षकानाम् अथवा मित्राणां समीपे प्रश्नः करणीयः।
- यदि सङ्कोचं कुर्मः तर्हि किं भवति?
- ज्ञानं प्राप्तुं न शक्नुमः खलु!
- अतः विद्याभ्यास-समये लज्जा त्यक्तव्या एव।



धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्॥५॥

**आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्।**

आहारे = भोजने / In (having) food, meal
अकारान्त-पुंलिङ्गशब्दस्य सप्तमी विभक्तिः, एकवचनम्।

व्यवहारे = आचरणे / In behaviour
पुंलिङ्गशब्दस्य सप्तमीविभक्तेः एकवचनम्।





धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्॥५॥

## वाक्यार्थः-

- भोजनसमये यत् आवश्यकं तत् प्रष्टव्यम्।
- यद् न आवश्यकं 'तत् मास्तु' इति विना सङ्कोचं वक्तव्यम्।
- अन्यथा कष्टं भवति। आहारपदार्थः व्यर्थः भवति।
- अन्यजनैः सह सामान्य-व्यवहारे अपि यः सङ्कोचरहितः भवति सः सुखम् आप्नोति।

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्॥५॥

## तात्पर्यम् –

- धनस्य सम्पत्तेः च प्रयोगेषु,
- ज्ञानस्य संग्रहे,
- भोजनसन्दर्भे,
- अन्यैः जनैः साकं आचरणे च
- एतेषु स्थानेषु यः सङ्कोचरहितः अस्ति तस्य जीवनं सुगमं भवति।

हिन्द्यर्थः –

धन-धान्य के प्रयोग में और विद्या के संग्रह में तथा आहार-व्यवहार में लज्जा को छोड़ने वाला ही सुखी होता है।

आङ्ग्लार्थः –

Those who do not feel shy in the way they us wealth and food, in knowledge, in acquirin food and in personal relations will always b happy.

क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः॥ ६॥



पदविभागः –

क्षमा, वशीकृतिः, लोके, क्षमया, किम्, न, साध्यते, शान्तिखड्गः, करे, यस्य, किम्, करिष्यति, दुर्जनः।

अन्वयः –

लोके क्षमा वशीकृतिः (अस्ति)। क्षमया किं न साध्यते? यस्
करे शान्तिखड्गः (अस्ति), (तस्य) दुर्जनः किं करिष्यति?

क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः॥ ६॥

- क्षमा वशीकृतिर्लोके।
- क्षमया किं न साध्यते?
- शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः।
- अस्मिन् सुभाषियते क्षमायाः शान्तेः च महत्त्वं वर्णितम् अस्ति।

१) क्षमा वशीकृतिर्लोके

क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः॥ ६॥

क्षमा = सहनशीलता / Forgiveness
आकारान्त-स्त्रीलिङ्गशब्दस्य प्रथमाविभक्तिः, एकवचनम्।

वशीकृतिर्लोके = वशीकृतिः + लोके

वशीकृतिः = वशीकरणम् / Captivation
स्त्रीलिङ्गशब्दस्य प्रथमाविभक्तिः, एकवचनम्।

लोके = जगति,संसारे/ in the world.
अकारान्त-पुंलिङ्गशब्दः, सप्तमीविभक्तिः, एकवचनम् ।

अस्मिन् जगति क्षमा सर्वान् वशीकरोति।



## क्षमया किं न साध्यते?

क्षमया सर्वं साधयितुं शक्यते।

| | | |
|---|---|---|
| क्षमा | = | सहनशीलतया/ forgiveness<br>आकारान्त-स्त्रीलिङ्गशब्दस्य तृतीया विभक्तिः, एकवचनम् – क्षमया । |
| साध्यते | = | साधयितुं शक्यते / can be achieved<br>साध् धातुः, लट्-लकारः, प्रथम-पुरुषः, एकवचनम्, कर्मणिप्रयोगः। |

- ❑ अस्मिन् संसारे क्षमा एका महती शक्तिः अस्ति।
- ❑ क्षमाम् उपयुज्य जनानां वशीकरणं शक्यम् अस्ति।

क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः॥६॥

**शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः॥**

| | | |
|---|---|---|
| शान्तिखड्गः | = | शान्तिकृपाणः/ Calmness as a weapon.<br>अकारान्त-पुंलिङ्गशब्दस्य प्रथमाविभक्तिः, एकवचनम्। |
| करे | = | हस्ते / In hand<br>अकारान्त-पुंलिङ्गशब्दस्य सप्तमीविभक्तिः, एकवचनम्। |
| यस्य | = | जिसका |
| करिष्यति | = | करेगा / will do<br>कृ धातुः, लृट्-लकारः, प्रथम-पुरुषः, एकवचनम्। |
| दुर्जनः | = | दुष्टः जनः / Wicked man<br>अकारान्त-पुंलिङ्गशब्दस्य प्रथमाविभक्तिः, एकवचनम्। |

- ❑ शान्तिः एकं तादृशं शस्त्रं भवति यत् अतीव प्रभावशालि अस्ति।
- ❑ यस्य हस्ते शान्तिरूपी खड्गः भवति।
- ❑ दुर्जनः तस्य जनस्य कथमपि हानिं कर्तुं न शक्नोति।



क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः॥६॥

**तात्पर्यम्-**

- क्षमा इति गुणेन सर्वेषां जनानां वशीकरणं कर्तुं शक्यते।
- यथा – पूर्वम् अङ्गुलिमालः इति हन्ता बुद्धस्य पुरतः आगत्य तं भायितवान्।
- मारयितुं अपि प्रयत्नं कृतवान् तदापि बुद्धः शान्त्या स्थितवान्।
- बुद्धस्य तादृशेन व्यवहारेण सः हन्ता अपि क्रोधं परित्यज्य शान्तः भूत्वा सज्जनः जातः।
- अतः 'क्षमा' अथवा 'शान्तिः' इति एतत् एकं शस्त्रम् अस्ति।
- तस्याः तुलना खड्गेन सह कृता अस्ति।
- तस्य खड्गस्य पुरतः कोऽपि क्रुद्धः स्थातुं न शक्नोति।

क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः॥६॥

**हिन्द्यर्थः -**

संसार में क्षमा सबसे बड़ा वशीकरण है, उससे क्या नहीं प्राप्त किया जा सकता है। जिसके हाथ में शान्ति की तलवार हो, उसका दुष्ट क्या बिगाड़सकता है, अर्थात् कुछ नहीं बिगाड़ सकता।

**आङ्ग्लार्थः-**

Forgiveness is the biggest captivating force in this world. One can attain everything through it. Even a wicked person can not harm any one, who holds the sword of peace in his hand.

# सुभाषितानि

# अभ्यासः

## १. सर्वान् श्लोकान् सस्वरं गायत।

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥ 1 ॥

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥ 2 ॥

दाने तपसि शौर्ये च विज्ञाने विनये नये ।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥ 3 ॥

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥ 4 ॥

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥ 5 ॥

क्षमावशीकृतिर्लोके क्षमया किं न साध्यते ।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥ 6 ॥

## 2. यथायोग्यं श्लोकांशान् मेलयत-

| क | ख |
|---|---|
| धनधान्यप्रयोगेषु | नासद्भिः किञ्चिदाचरेत्। |
| विस्मयो न हि कर्तव्यः | त्यक्तलज्जः सुखी भवेत्। |
| सत्येन धार्यते पृथ्वी | बहुरत्ना वसुन्धरा। |
| सद्भिर्विवादं मैत्रीं च | विद्यायाः संग्रहेषु च। |
| आहारे व्यवहारे च | सत्येन तपते रविः। |

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।
विस्मयो न हि कर्त्तव्यः बहुरत्ना वसुन्धरा।
सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चित् आचरेत्।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्।

## 3. एकपदेन उत्तरत-

❖ (क) पृथिव्यां कति रत्नानि?
  ○ **त्रीणि।**

❖ (ख) मूढैः कुत्र रत्नसंज्ञा विधीयते?
  ○ **पाषाणखण्डेषु।**

❖ (ग) पृथ्वी केन धार्यते?
  ○ **सत्येन।**

❖ (घ) कैः सङ्गतिं कुर्वीत?
  ○ **सद्भिः।**

❖ (ङ) लोके वशीकृतिः का?
  ○ **क्षमा।**

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥ 1 ॥

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥ 2 ॥

दाने तपसि शौर्ये च विज्ञाने विनये नये ।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥ 3 ॥

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥ 4 ॥

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥ 5 ॥

## 4. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत –

| | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्र.वि. | कः | कौ | के |
| द्वि.वि. | कं | कौ | कान् |
| तृ.वि. | केन | काभ्यां | कैः |

किम् [शब्दः] स्त्रीलिङ्गम्

| | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्र.वि. | का | के | काः |
| द्वि.वि. | कां | के | काः |
| तृ.वि. | कया | काभ्यां | काभिः |
| च.वि. | कस्यै | काभ्यां | काभ्यः |
| प.वि. | कस्याः | काभ्यां | काभ्यः |

अकारान्त-नपुंसकलिङ्गशब्दः,
तृतीया-विभक्तिः, एकवचनम्

(क) <u>सत्येन</u> वाति वायुः।

**<u>केन</u> वाति वायुः?**

तकारान्त-पुंलिङ्गशब्दः,
तृतीया-विभक्तिः, बहुवचनम्

(ख) <u>सद्भिः</u> एव सहासीत।

**<u>कैः</u> एव सहासीत?**

आकारान्त-स्त्रीलिङ्गशब्दः,
प्रथमाविभक्तिः, एकवचनम्

(ग) <u>वसुन्धरा</u> बहुरत्ना भवति।

**<u>का</u> बहुरत्ना भवति?**

आकारान्त-स्त्रीलिङ्गशब्दः,
षष्ठी-विभक्तिः, एकवचनम्

(घ) <u>विद्यायाः</u> संग्रहेषु त्यक्तलज्जः सुखी भवति।

**<u>कस्याः</u> संग्रहेषु त्यक्तलज्जः सुखी भवति?**

ईकारान्त-स्त्रीलिङ्गशब्दः,
द्वितीया-विभक्तिः, एकवचनम्

(ङ) सद्भिः <u>मैत्रीं</u> कुर्वीत।

**सद्भिः <u>कां</u> कुर्वीत? / सद्भिः किं कुर्वीत?**

## 5. प्रश्नानाम् उत्तराणि लिखत –

(क) कुत्र विस्मयः न कर्त्तव्यः?

**दाने तपसि शौर्य च विज्ञाने विनये नये विस्मयः न हि कर्त्तव्यः।**

(ख) पृथिव्यां त्रीणि रत्नानि कानि?

**पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।**

(ग) त्यक्तलज्जः कुत्र सुखी भवेत्?

**धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च।**


पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥ 1 ॥

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥ 2 ॥

दाने तपसि शौर्ये च विज्ञाने विनये नये ।
विस्मयो न हि कर्तव्यो बहुरत्ना वसुन्धरा ॥ 3 ॥

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥ 4 ॥

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥ 5 ॥

क्षमावशीकृतिर्लोके क्षमया किं न साध्यते ।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥ 6 ॥

## 6. मञ्जूषातः पदानि चित्वा लिङ्गानुसारं लिखत-

रत्नानि वसुन्धरा सत्येन सुखी अन्नम् वह्निः रविः पृथ्वी सङ्गतिम्

'आनि' – नपुंस[illegible] ... इत्यादि

यथा - फलानि, [illegible] ... शक्तिम्, भक्तिम्, गतिम्

रत्न - अकारान्त-नपुंसकलिङ्गशब्दः, [illegible] ... स्त्रीलिङ्गशब्दः द्वितीयाविभक्तिः एकवचनम् - सङ्गतिम्।

यथा – रामेण, हस्तेन........ इत्यादीनि। यथा - मतिः, शक्तिः इत्यादि।

रत्न – (नपुंसकलिङ्गम्)

सत्य - अकारान्त-नपुंसकलिङ्गशब्दः तृतीया[illegible]

वह्नि - इकारान्त-पुंलिङ्ग[illegible]

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा-विभक्तिः | रत्नम् | रत्ने | रत्नानि |

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| ....सुखी..... | .....वसुन्धरा..... | .....रत्नानि..... |
| ....वह्निः..... | .....पृथ्वी..... | .....सत्येन..... |
| ....रविः..... | .....सङ्गतिम्.. | .....अन्नम्..... |

## 7. अधोलिखितपदेषु धातवः के सन्ति?

| पदम् | धातुः | |
|---|---|---|
| करोति | ....कृ........ | कृ धातुः, लट्-लकारः, प्रथम-पुरुषः, एकवचनम् |
| पश्य | ....दृश्........ | दृश् धातोः, लट्-लकारः, मध्यम-पुरुषः, एकवचनम् |
| भवेत् | ....भू........ | भू धातोः, विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| तिष्ठति | ....स्था........ | स्था धातुः, लट्-लकारः, प्रथम पुरुषः, एकवचनम् |

# धन्यवाद